# Dehalishastutih

# देहलीशस्तुतिः

## Document Information

```
Text title : dehalIshastutiH
File name : dehalIshastutiH.itx
Category : vishhnu, vedAnta-deshika
Location : doc_vishhnu
Author : vedAntadeshika
Proofread by : PSA Easwaran psawaswaran at gmail.com
Description/comments : Edited by S. V. Radhakrishna Shastriji
Acknowledge-Permission: Mahaperiaval Trust
Latest update : May 13, 2018
Send corrections to : sanskrit at cheerful dot c om
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# देहलीशस्तुतिः

वेदान्तदेशिककृता
(गोपपुरे - तिरुक्कोयिलूर् - पण्णातटे)
विक्रम्य येन विजितानि जगन्ति भूम्ना
विश्वस्य यं परमकारणमामनन्ति ।
विश्राणयन् प्रणयिनां विविधान् पुमर्थान्
गोप्ता स मे भवतु गोपपुराधिराजः ॥ १॥

देहल्यधीश्वर तवेदृशमीश्वरत्वं
तुष्टूषतां दिशति गद्गदिकानुबन्धम् ।
वाचालयस्यथ च मां क्वचन क्षपायां
क्षान्तेन दान्त कविमुख्यविमर्दनेन ॥ २॥

त्वच्चक्रवद्द्रुतमनेहसि घूर्णमाने
निम्नोन्नतक्रमनिदर्शितनेमिवृत्ताः ।
आराध्य गोपनगरे कृपयोदितं त्वां
स्वाराज्यमग्र्यमलभन्त सुरासुरेन्द्राः ॥ ३॥

आकल्पपुष्पसुभगोन्नतबाहुशाखः
पादे सदा परिपचेलिमसत्फलस्त्वम् ।
पण्णातटस्पृशि मृकण्डुतपोवनेऽस्मिन्
छायानिलीनभुवनोऽसि तमालशाखी ॥ ४॥

चक्रस्य दैत्यदनुजादिषु वामभावं
शङ्खस्य चाश्रितजनेष्वपि दक्षिणत्वम् ।
व्यक्तं प्रदर्शयति गोपपुराधिराज
व्यत्यस्य नूनमनयोः करसम्प्रयोगम् ॥ ५॥

दीपेन केनचिदशीतरुचा निशीथे
स्नेहोपपन्नपरिशुद्धगुणार्पितेन ।

दह्यावकाशनिबिडं ददृशुर्भवन्तं
स्वाध्याययोगनयनाः शुचयः कवीन्द्राः ॥ ६॥

कासारपूर्वकविमुख्यविमर्दजन्मा
पण्णातटेक्षुसुभगस्य रसो बहुस्ते ।
त्वत्पादपद्ममधुनि त्वदनन्यभोग्ये
नूनं समाश्रयति नूतनशर्करात्वम् ॥ ७॥

वैरोचनेः सदसि वामनभूमिकावान्
विक्रान्तिताण्डवरसेन विजृम्भमाणः ।
चक्रे भवान् मकरकुण्डलकर्णपाशः
श्यामैकमेघभरितामिव सप्तलोकीम् ॥ ८॥

चित्रं न तत्त्रिषु मितानि पदेषु धत्ते
विश्वान्यमूनि भुवनानि विशङ्कटेषु ।
भक्तैः समं क्वचिदसौ भवनैकदेशे
माति स्म मूर्तिरमिता तदिहाद्भुतं नः ॥ ९॥

भक्तप्रिय त्वयि तथा परिवर्धमाने
मुक्तावितानविततिस्तव पूर्वमासीत् ।
हारावलिः परमथो रशनाकलापः
तारागणस्तदनु मौक्तिकनूपुरश्रीः ॥ १०॥

भिक्षोचितं प्रकटयन् प्रथमाश्रमं त्वं
कृष्णाजिनं यवनिकां कृतवान् प्रियायाः ।
व्यक्ताकृतेस्तव समीक्ष्य भुजान्तरे तां
त्वामेव गोपनगरीश जना विदुस्त्वाम् ॥ ११॥

सत्कुर्वतां तव पदं चतुराननत्वं
पादोदकं च शिरसा वहतां शिवत्वम् ।
एकत्र विक्रमणकर्मणि तद्द्वयं ते
देहल्यधीश युगपत्प्रथितं पृथिव्याम् ॥ १२॥

भक्तोपरोधसह पादसरोजतस्ते
मन्दाकिनी विगलिता मकरन्दधारा ।
सद्यस्त्रिवर्गमपवर्गमपि क्षरन्ती
पुण्या बभूव पुरशासन मौलिमाला ॥ १३॥

विक्रान्तकेतुपटिका पदवाहिनी ते
न्यञ्चन्त्युपैति नतजीवितशिंशुमारम् ।
औत्तानपादिममृतांशुमशीतभानुं
हेमाचलं पशुपतिं हिमवन्तमुर्वीम् ॥ १४॥

वेधः कमण्डलुजलैर्विहितार्चनं ते
पादाम्बुजं प्रतिदिनं प्रतिपद्यमाना ।
स्तोत्रप्रिय त्रिपथगाऽऽदिसरिद्वराणां
पण्णा बभूव भुवने बहुमानपात्रम् ॥ १५॥

स्वच्छन्दविक्रमसमुन्नमितादमुष्मात्
स्रोतस्त्रयं यदभवत्तव पादपद्मात् ।
वेतालभूतसरसामपदिश्य वाचं
प्रायेण तत्प्रसवभूमिमवाप भूयः ॥ १६॥

क्रीडापरेण भवता विहितोपरोधान्
आराधकाननुपरोधमुदञ्चयिष्यन् ।
ताम्रेण पादनखरेण तदाऽण्डमध्ये
घण्टापथं कमपि नूनमवर्तयस्त्वम् ॥ १७॥

कामाविलेऽपि करुणार्णवबिन्दुरेकः
क्षिप्तः स्वकेलि तरसा तव देहलीश ।
तत्सन्ततेरुभयथा विततिं भजन्त्याः
संसारदावदहनं शमयत्यशेषम् ॥ १८॥

नीडोदरान्निपतितस्य शुकार्भकस्य
त्राणेन नाथ विहरन्निव सार्वभौमः ।
आदाय गोपनगराधिपते स्वयं मां
क्रीडा दया व्यतिकरेण कृतार्थय त्वम् ॥ १९॥

लीलाशकुन्तमिव मां स्वपदोपलब्ध्यै
स्वैरं क्षिपन् दुरितपञ्जरतो गुणस्थम् ।
तत्तादृशं कमपि गोपपुरीविहारिन्
सन्तोषमुल्ललय सागरसम्भवायाः ॥ २०॥

वातूलकल्पवृजिनप्रभवैर्मदीयां

वैयाकुलीं विषयसिन्धुतरङ्गभङ्गैः ।
दासोपमर्दसह दुर्निरसां त्वदन्यैः
अन्वीक्ष्य गाढमनुकम्पितुमर्हसि त्वम् ॥ २१॥

एनस्विनीमिति सदा मयि जायमानां
देहल्यधीश दृषदोऽपि विलापयन्तीम् ।
नाथे समग्रशकने त्वयि जागरूके
किं ते सहेत करुणा करुणामवस्थाम् ॥ २२॥

आत्मोन्नतिं परनिकर्षमपीह वाञ्छन्
निम्नेऽपि मोहजलधौ निपतामि भूयः ।
तन्मामुदञ्चय तवोन्नतपादनिघ्नं
देहल्यधीश गुणितेन दयागुणेन ॥ २३॥

अक्षीणकल्मषरसोऽपि तवानृशंस्यात्
लक्ष्मीसमक्षमपि विज्ञपयाम्यभीतः ।
भक्तोपमर्दरसिक स्वयमल्पबुद्धेः
यन्मन्यसे मम हितं तदुपाददीथाः ॥ २४॥

मन्ये दयार्द्र हृदयेन महाधनं मे
दत्तं त्वयेदमनपायमकिञ्चनत्वम् ।
येन स्तनन्धयमिव स्वहितानभिज्ञं
न्यासीकरोषि निजपादसरोरुहे माम् ॥ २५॥

दुर्वारतीव्रदुरितप्रतिवावदूकैः
औदार्यवद्भिरनघस्मितदर्शनीयैः ।
देहल्यधीश्वर दयाभरितैरपाङ्गैः
वाचं विनापि वदसीव मयि प्रसादम् ॥ २६॥

अयमनवमसूक्तैरादिभक्तैर्यथावत्
विशदितनिजतत्त्वो विश्वमव्यादभव्यात् ।
रथचरणनिरूढव्यञ्जनानां जनानां
दुरितमथनलीलादोहली देहलीशः ॥ २७॥

इयमवितथवर्णा वर्णनीयस्वभावात्
विदितनिगमसीम्ना वेङ्कटेशेन गीता ।
भवमरुभुवि तृष्णालोभपर्याकुलानां

दिशतु फलमभीष्टं देहलीशस्तुतिर्नः ॥ २८॥

इति वेदान्तदेशिककृता देहलीशस्तुतिः समाप्ता ।

Proofread by PSA Easwaran

---

*Dehalishastutih*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*